Shodh Sangam Patrika
E-ISSN: 3049-0707, Volume 3 | Issue 2 | (April – June 2026)

# महाभारते वृक्षचैतन्यविमर्शः

**डॉ. कोमल शैलेषभाई भट्ट**
सहायक प्राध्यापिका, सरकारी कला एवं वाणिज्य महाविद्यालयः, जादर, गुजरातम्

**सारांशः**

वृक्षे चैतन्यमस्ति इति विषयः प्राचीनकालात् विचारणीयः अस्ति। अस्मिन् शोधपत्रे वेद, उपनिषद् तथा महाभारतादि ग्रन्थानां आधारेण वृक्षचैतन्यस्य विवेचनं कृतम्। विशेषतः महाभारतस्य शान्तिपर्वणि वर्णितः भारद्वाज–भृगुसंवादः अस्य अध्ययनस्य मुख्याधारः अस्ति। तत्र वृक्षेषु चैतन्यस्य अस्तित्वं तर्कसंगतरीत्या प्रतिपादितम्। अध्ययनस्य उद्देश्यं वृक्षेषु चेतनास्वरूपं दार्शनिकतया, शास्त्रीयतया तथा वैज्ञानिकदृष्ट्या परीक्षणम्। निष्कर्षतः प्रतिपद्यते यत् वृक्षाः केवलं जडपदार्थाः न, अपितु संवेदनशील-चेतनयुक्ताः जीवाः सन्ति। वृक्षे चैतन्यमस्ति तस्मिन् विषये प्रायः वयं पृच्छामः तदा तस्य संशोधकरूपेण अस्माकं भारते जगदीशचन्द्र बोस इति नाम मुखे आगच्छति किन्तु महाभारते यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ।। तदनुसारं महाभारते सर्वज्ञानं वर्तते।

**मुख्यशब्दाः** - वृक्षचैतन्यम्, महाभारतम्, शान्तिपर्व, भारद्वाजभृगुसंवादः, पञ्चमहाभूतानि, तर्कविश्लेषणम्, संवेदनशीलता, ज्ञानमीमांसा

## प्रस्तावना

किं नाम चैतन्यम्? इति प्रश्नः भारतीयदर्शने अत्यन्तं महत्त्वपूर्णः अस्ति। चिती संज्ञाने इत्यस्माद् धातोः चेतनशब्दः निष्पद्यते, तस्य भावः चैतन्यम्। भारतीयदर्शने चैतन्यं ज्ञानरूपं तत्त्वं मन्यते, यत् आत्मा, ब्रह्म, प्रज्ञा, चेतना इत्यादिभिः सह सम्बद्धम् अस्ति।

अस्य शोधस्य उद्देश्यं वृक्षेषु चैतन्यस्य अस्तित्वं परीक्षणं तथा तस्य प्रासंगिकतायाः विवेचनम् अस्ति। आधुनिक-पर्यावरण-सन्दर्भे अपि एषः विषयः अत्यन्तं प्रासंगिकः अस्ति।

## चैतन्यस्य संकल्पना

चैतन्यं चेतनस्य भावः, ज्ञानक्रियाकर्तृत्वरूपं तत्त्वम् इति परिभाष्यते। वाचस्पत्यम्, शब्दकल्पद्रुमादिषु ग्रन्थेषु चैतन्यं चेतनस्वरूपमेव इति निरूपितम्।

उपनिषद्सु चैतन्यं 'आत्मा' अथवा 'ब्रह्म' इति कथ्यते-"प्रज्ञानं ब्रह्म", "अयमात्मा ब्रह्म" इत्यादि।

सर्वेषु दर्शनेषु चैतन्यस्य सत्ता स्वीकृता, यद्यपि तस्य स्वरूपं भिन्नतया निरूपितम्।

## वेदेषु-उपनिषत्सु वृक्षचैतन्यविमर्शः

वृक्षाणां प्राणशक्तिः चैतन्यः जीवाः वा सन्ति वा न वा इति अत्यन्तं विवादास्पदः विषयः। केचन् लेखकाः वृक्षान् जीवत्वेन मन्यन्ते, केचन् न मन्यन्ते। ये न श्रद्धयन्ति, ते वदन्ति यत् सर्वं कार्यं वृक्षेषु रासायनिकप्रक्रियाद्वारा क्रियते, तेषु जीवाः न सन्ति। अन्ये विद्वांसः वृक्षान् जीवान् मन्यन्ते, तेषां जीवनसंचारः, रोदन-हासः, निद्रा-जागरणादिकं मनुष्याणाम् इव मन्यन्ते। वृक्षे चैतन्यमस्ति तस्मिन् विषये प्रायः वयं पृच्छामः तदा तस्य संशोधकरूपेण अस्माकं भारते जगदीशचन्द्र बोस

इति नाम मुखे आगच्छति किन्तु वेदात् आरभ्य संस्कृतवाङ्मये तस्य प्रमाणानि सन्ति। वेदेषु प्राप्यमाणाः विवरणाःअत्र दत्ताः।

ऋग्वेदे वर्णितमस्ति यत् अमरः अग्निः (आत्मा ) औषधीषु (वनस्पतिषु) प्रकाश्यते इति।[४] अथर्ववेदः वर्णयति यत् महत् ब्रह्मणः(आत्मा) सत्तायाः कारणादेव वीरुध् (वृक्षः–वनस्पतयः) श्वसन्ति।[५] अन्यस्मिन् मन्त्रे अपि उक्तं यत् वृक्षाः निद्रां कुर्वन्ति।[६] ऋग्वेदे तु एकः सम्पूर्णः औषधिसूक्तमस्ति। २३ मन्त्रेषु औषधिमहत्वं प्रतिपादितं वर्तते।[७] यजुर्वेदे अपि वनानां पतये नमः। वृक्षाणां पतये नमः। इत्योल्लेखं प्राप्यते।[८] अथर्ववेदे वर्णितं वर्तते यत् जीवः मृत्योः पश्चात् औषधिरूपेण पुनर्जन्मं प्राप्नोति। - औषधीषु प्रतितिष्ठा शरीरैः।[९] एकस्मिन् अन्यमन्त्रेषु अपि कथयति यत् वृक्षे चैतन्यं वर्तते अतः तस्य व्रणाः वर्षाभ्यान्तरे निरामयाः भवन्ति।[१०] अत्र स्पष्टतया वेदे वृक्षचैतन्यं वर्णितमस्ति।

बृहदारण्यकोपनिषदि मनुष्यवृक्षयोः सादृश्यं वर्णयन् वृक्षाः वनस्पतयः अपि मनुष्याणां सदृशाः इति उक्तम्। पुरुषाणां केशाः, वृक्षाणां पत्राणि उभयोः शरीरे चर्म भवति। त्वक्छेदेषु रक्तं निर्गच्छति। वृक्षाणां त्वचातः रसः अपि निर्गच्छति। मनुजशरीरे श्याला वृक्षे शर्करा च। मनुष्यशरीरे अस्थीनि सन्ति, वृक्षे काष्ठानि सन्ति। उभौ व्रणौ स्वस्थौ भवतः।

यथा वृक्षों वनस्पतिस्तथैव पुरुषोऽमृषा।

तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः।।[११]

कौषीतकि ब्राह्मणे उक्तमस्ति यत् "प्राणो वनस्पतिः"[१२] ऐतरेय ब्राह्मणे अपि "प्राणो वै वनस्पतिः" इति कथयति।[१३]

**महाभारते वृक्षचैतन्यविमर्शः**

महाभारतम् स्मृति-इतिहास ग्रन्थेषु प्रमुखः काव्यग्रन्थः वर्तते। महाभारते वेदानां रहस्यम् एवं विस्तारम्, उपनिषदः सम्पूर्णं सारमस्ति। ग्रहनक्षत्रतारादिकानां परिमाणं, न्यायिकशिक्षा, चिकित्साज्ञानं, खगोलभूगोलवर्णनं ज्ञानविज्ञानशास्त्र धर्मराजनीतिकदर्शनं कर्मयोगदर्शनं भौतिकशास्त्र अध्यात्मशास्त्र आर्यजातेः अद्वितीयं सर्वागं सर्वशक्तिमानं शास्त्र वर्तते। अतः एव महाभारतं महाकाव्यमस्ति। उच्यते यत् -

यदिहास्ति तदन्यत्र यन्नहास्ति न कुत्रचित् ।

महाभारत – स्वर्गारोहणपर्व ५.५०

यत् ज्ञानं महाभारते अस्ति तदेव सर्वत्र अस्ति यत् महाभारते नास्ति तत् ज्ञानं कुत्रचित् अपि न वर्तते। यतो हि महाभारते सर्वविषयानां विशदतया वर्णनं वर्तते।

श्रीमहाभारते शान्तिपर्वणि धर्मराजयुधिष्ठिरः सृष्टिउत्पत्तिविषयकं प्रश्नं पृच्छति

कुतः सृष्टमिदं विश्वं जगत् स्थावरजङ्गमम् ।

प्रलये च कमभ्येति तन्मे ब्रूहि पितामह । ।

- शान्तिपर्व १८२/१

तदा भीष्मपितामहः कथयति यत्

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।

भृगुणाभिहितं शास्त्रं भरद्वाजाय पृच्छते । ।

- शान्तिपर्व १८२/५

विज्ञपुरुषैः एतस्मिन् विषये प्राचीन-इतिहासस्य उदाहरणं दीयते। कैलासशिखरे देदीप्यमानं महौजसं भृगुमुनिं भरद्वाजऋषिः सृष्टि-उत्पत्तिविषयकं प्रश्नं पृच्छति तत्र एव द्वयशीत्यधिकशततमे अध्यायतः भरद्वाजभृगु मुनयोः संवादे जगतः उत्पत्तेः एवं विभिन्नानां तत्त्वानां वर्णनं वर्तते। भृगुमुनिः कथयति यत् सम्पूर्णं पञ्चभिर्भूतैर्युक्तं स्थावरजङ्गमजगत् श्रोत्रघ्राणरसस्पर्शदृष्टिश्चेन्द्रियसंज्ञिताः। तस्मिन् समये भरद्वाज मुनिः प्रश्नं पृच्छति यत्

पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावरजङ्गमाः ।

स्थावराणां न दृश्यन्ते शरीरे पञ्च धातवः।।[१४]

इतः वृक्षचैतन्यविमर्शः आरभते। भरद्वाजमुनिः कथयति यत् वृक्षशरीरः अनूष्णाचेष्टा भवति। तत्त्वतः घनानां वृक्षाणाम् पञ्च धातवः न उपलभ्यन्ते। न शृण्वन्ति न पश्यन्ति न गन्धरसवेदिनः न च स्पर्शं विजानन्ति चेत् ते वृक्षाः कथं पञ्चभौतिकाः ? वृक्षे द्रवत्वं न दृश्यते, न अग्निभूमिवायुआकाशस्यप्रमेयत्वाद् अंशः न दृश्यते। अतः पञ्चभौतिकता सिद्धं न भवति।

भरद्वाजमुनिना एतादृशानि प्रश्नानि क्रियते तदा भृगुमुनिः उत्तरं ददाति यत् –

घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः।

तेषां पुष्पफलव्यक्तिर्नित्यं समुपपद्यते ।।[१५]

अत्र भृगुऋषिणा वृक्षे पञ्चभौतिकता वर्तते तत् तर्कयुक्तं प्रतिपादितमस्ति। भृगुऋषिः कथयति यत् यद्यपि घनानां वृक्षाणामाकाशः अस्ति तत्र न काऽपि संशयः। तस्मात् कारणात् एव नित्यं पुष्पफलादिनाम् उत्पत्तिः सम्भवते। अतः आकाशः अस्ति इति सिद्ध्यते। अग्रे स्पर्शनिरूपणं कर्तुं कथयति यत्

ऊष्मतो म्लायते पर्णे त्वक् फलं पुष्पमेव च।

म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते।।[१६]

वृक्षे या उष्मा भवति तेन कारणेन एव वृक्षस्य पर्ण-त्वक्–फल-पुष्पाणि म्लायन्ते शीर्यन्ते च। अतः वृक्षे स्पर्शमस्ति तत् सिद्धं भवति। ऋग्वेदस्य कथनमस्ति यत् वृक्ष – वनस्पतिगर्भे अग्निं धारयति।[१७] वनस्पतिलातासु पुष्पफलवृद्ध्यादि अग्निकारणादेव भवति।[१८] अथर्ववेदे तु कथितमस्ति यत् अग्निकारणादेव पुष्पफलेषु मधुरतां यान्ति।[१९] कौषीतकि ब्राह्मणे अपि उक्तमस्ति यत् "अग्निर्वै वनस्पतिः"।[२०] वृक्षः अग्निः अस्ति एवं आग्नेयतत्वयुक्तम् अस्ति।[२१]

भरद्वाजमुनिः अग्रे कथयति यत् जगति दृश्यन्ते यत् यदा वायु-अग्नि-विद्युत्-आदिनां निर्घोषैः फलपुष्पाणि विशीर्यन्ते, निर्घोषैः वृक्षात् फलपुष्पाणि पतन्ति। शब्दानां ग्रहणं श्रवणेन्द्रियात् भवति अतः सिद्धं भवति यत् वृक्षाः शृण्वन्ति। आधुनिकैः वैज्ञानिकैः प्रयोगमपि अकरोत् यद् वृक्षान् प्रतिदिनं संगीतं श्रावयति, तस्य फलस्वरूपे अन्यैः अपेक्षया यान् वृक्षान् संगीतं श्रावितवन्तः तेषां वृक्षाणाम् वृद्धिः अधिकम् एवं च सम्यक्तया अभवत्। अतः सिद्ध्यते यत् वृक्षान् श्रवणेन्द्रियमस्ति।

भरद्वाजमुनिः अग्रे कथयति यत्

वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति ।

न ह्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः।।[२२]

लता वृक्षं वेष्टयते एवं उपरि भागं प्रति आरोहणं करोति, एवं सा लता - वल्ली समानमेव एकस्मिन् दिशि एव उपरि आरोहणं करोति, अतः यदि चक्षुः न भवति तर्हि लतां मार्गं न मिलति अतः एतत् सिद्धं भवति यत् पादपाः पश्यन्ति। ( चक्षु- इन्द्रिय )

पवित्र - अपवित्र गन्धेन नानाप्रकार-धूपेन वृक्षाः नीरोगं - अरोगं भूत्वा पुष्पिताः भवन्ति यतो हि प्रमाणितं भवति यत् वृक्षाः जिघ्रन्ति।[२३] वृक्षाः स्वमूलात् जलं पिबन्ति । वृक्षेषु जलस्य अधः ऊर्ध्वं गमनम् अपि भागवतपुराणे वर्णितमस्ति।[२४] यदि कोऽपि वृक्षे व्याधि-रोगः भवति तदा वृक्षमूले औषधिसेचनं कृत्वा चिकित्सां कुर्वन्ति अतः सिद्ध्यते यत् द्रुमाणां रसनेन्द्रियं भवति। वराहमिहिरः एवं काश्यपः कथयति यत् अधिक शीतधूप- तीव्रवायुभिः वृक्षे रोगः भवति, तेन कारणेन पर्णानि पीतवर्णीयाः भवन्ति, शाखाः शुष्काः भवन्ति।[२५] वृक्षचिकित्सार्थं वृक्षस्य रूग्ण – अंगस्य केनापि शस्त्रेण छेदनं करणीयम्। एवं तस्योपरि विडंग-धृत-पङ्कमिश्रणं कृत्वा तस्य मिश्रणस्य तद्भागोपरि लेपनं करणीयं पश्चात् दुग्धमिश्रितं जलं वृक्षे सेचनीयम्।

चिकित्सितमथैतेषां शस्त्रेणादौ विशोधनम् ।

विडंग-धृत-पंकाक्तान् सेचयेत् क्षीरवारिणा।।[२६]

अथर्ववेदेऽपि वर्णितं वर्तते यत् पलाल-तिलपिंजीमिश्रणं सेचनात् वृक्षाः नीरोगाः भवन्ति।

यवस्य ते पलाल्या तिलस्य तिलपिंज्या । वीरुत् क्षेत्रियनाशनी।[२७]

इतोऽपि अग्रे वृक्षे चैतन्यं वर्तते तस्य सिद्ध्यर्थं कथयन्ति यत्

वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत् ।

तथा पवनसंयुक्तः पादैः पिबति पादपः।।[२८]

यथा मनुष्यः कमलनालं मुखे संस्थाप्य कमलनालेन जलं उपरि कर्षति तथैव वायुसहायतयायुक्तवृक्षः स्वमूलेन जलं उपरि कर्षति । वृक्षस्य यदा छेदनं भवति तदा नूतनं अंकुरम् उद्भवति। तथा च सुखदुःखयोः ग्रहणमपि करोति। अतः भरद्वाजमुनिः अन्ते एतादृशानि तर्कयुक्तं कारणानि दत्वा कथयति यत् "जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते।।"

वृक्षः स्वमूलात् जलम् आदत्ते। वृक्षे स्थितं वायुः एवं अग्निः जलं जरयति । आहारस्य परिणामात् वृक्षे स्निग्धता एवं वृद्धिः भवति। वृक्षे अग्नितत्त्वकारणात् उष्मा अस्ति, सः स्वरसं कर्षति परिपाकं च करोति अतः एव वृक्षे वृद्धिः भवति इति कौषीतकी ब्राह्मणे अपि प्रतिपादितमस्ति।[२९]

वृक्षे रससंचारः भवति तस्य संकेतः वैशेषिकदर्शने अपि मिलति – 'वृक्षाभिसर्पणम्[३०]

षड्दर्शनसमुच्चयोपरि गुणरत्नस्य या टीका वर्तते तन्मध्ये अपि मानवस्य वनस्पतिजीवनस्य च सादृश्यं दर्शयति। यथा मातृक्षीरभोजनादिभिः मनुष्यशरीरं पोष्यते तथैव वनस्पतयः मृदाजलभोजनादिभिः पोषिताः भवन्ति। यथा सम्यक्

अनुचितं च आहारं मनुष्यशरीरस्य वृद्धिं वा हानिं वा जनयति तथैव वनस्पतिशरीरस्यापि।

यथा मनुष्यशरीरं स्तनक्षीरव्यंजन..... तथा वनस्पतिशरीरमपि।

गुणरत्नेन लज्जावन्त्याः लज्जालुत्वस्य उल्लेखः कृतः अस्ति। ये वनस्पतयः निद्रां कुर्वन्ति, जागरन्ति च तेषां सूची अपि सः दत्तवान् अस्ति।

लज्जालूप्रभृतीनां हस्तादिसंसर्गात् पत्रसंकोचादिका परिस्फुटक्रिया उपलभ्यते।

शमीप्रपुन्नाट............ अगस्त्यामलकीकडिप्रभृतीनां स्वापविबोधतः

संस्कृतसाहित्ये वृक्षचेतनायाः चर्चा मानवतायाः प्रकृतेः च गहनसम्बन्धं प्रकाशयति। एतत् दर्शयति यत् वृक्षाः केवलं भौतिकसम्पदां न सन्ति, अपितु ते जीवनस्य, चैतन्यस्य, आध्यात्मिकतायाः च गहनाः प्रतीकाः सन्ति। अस्माभिः वृक्षाणां रक्षणं करणीयम्, तेषां महत्त्वं च अवगन्तव्यम्, येन वयं संतुलितं समृद्धं च जीवनं जीवितुं शक्नुमः।

महाभारते वृक्षचैतन्यस्य केवलं विमर्शः न अपितु तस्य संरक्षणस्य महत्त्वमपि वर्णितं वर्तते। भीमस्य वृक्षस्य उत्पाटनस्य उदाहरणं दर्शयति यत् वृक्षाणां अस्तित्वं संरक्षणं च कियत् महत्त्वपूर्णम् अस्ति। महाभारते बहुषु स्थानेषु वृक्षाः उल्लिखिताः सन्ति। भीमस्य वृक्षस्य उत्पाटनस्य उदाहरणं अथवा अश्वत्थमस्य वृक्षः, यः अमरत्वस्य प्रतीकः अस्ति, तत् वृक्षाणां सम्मानस्य, तेषां चैतन्यस्य च प्रतीकम् अस्ति।

**उपसंहृतिः**

अस्मिन् शोधपत्रे "वृक्षचैतन्यम्" इति विषयः महाभारतस्य शान्तिपर्वणि वर्णित-भारद्वाज-भृगुसंवादस्य आधारेण विश्लेषितः अस्ति। चैतन्यस्य स्वरूपं, तस्य दार्शनिक-परिभाषा, तथा भारतीय-दर्शन-परम्परायां तस्य स्थानं प्रथमं निरूपितम् । अनन्तरं वृक्षचैतन्यविषये विद्यमानविवादः—वृक्षाः चेतनवन्तः वा अचेतनाः—इति प्रश्नः प्रस्तुतः।

अतः प्रस्तुतविवेचनायां भृगुऋषिणा क्रमशः तर्कबद्धेण बहून्युदाहरणानि प्रतिपादितानि सन्ति। तेभ्यः उदाहरणेभ्यः स्पष्टीभवति यत् वृक्षे जीवः अस्ति। भृगुऋषिणा दत्तानि उदाहरणानि सर्वत्र परिलक्ष्यते अतः यत् सिद्धं भवति यत् वृक्षे चैतन्यमस्ति।

भृगुमुनिना दत्तैः तर्कैः वृक्षेषु पञ्चमहाभूतात्मकता, ज्ञानेन्द्रियसदृशाः प्रतिक्रियाः, संवेदनशीलता च सिद्धा इति प्रतिपादितम्। वेद, उपनिषद्, ब्राह्मणग्रन्थेषु अपि वृक्षेषु प्राण, चेतना, निद्रा, संवेदनादीनां उल्लेखः प्राप्तः। आधुनिक-वैज्ञानिक-दृष्ट्या अपि वृक्षेषु जीवनलक्षणानि—वृद्धिः, प्रतिक्रियाशीलता, पोषणप्रक्रिया—इत्यादयः दृश्यन्ते, येन प्राचीन-भारतीय-दृष्टिकोणस्य समर्थनं भवति।

अन्ततः एषः अध्ययनः दर्शयति यत् वृक्षाः केवलं जडपदार्थाः न, अपि तु चेतनयुक्ताः जीवाः सन्ति। अतः पर्यावरणसंरक्षणदृष्ट्या वृक्षरक्षणस्य महत्त्वं विशेषतया प्रतिपाद्यते।

अतः सम्पूर्णविवेचनस्य आधारतः स्पष्टं भवति यत् महाभारतस्य शान्तिपर्वणि वर्णिते भारद्वाज–भृगुसंवादे वृक्षचैतन्यस्य सशक्तं तर्कसंगतं च प्रतिपादनं कृतम् अस्ति। भृगुमुनिना प्रस्तुताः दृष्टान्ताः—यथा पञ्चमहाभूतात्मकता, स्पर्शानुभवः, ध्वनिग्रहणम्, दिग्ज्ञानम्, जलपानप्रक्रिया, रोग-चिकित्सा तथा पुनरुत्पादनशक्तिः—एते सर्वे वृक्षेषु जीवनलक्षणानां सूचकाः सन्ति। एते तर्काः केवलं दार्शनिककल्पना न, अपि तु अनुभव-आधारिताः, निरीक्षण-परकाः च सन्ति।

वेद, उपनिषद्, ब्राह्मणग्रन्थाः अपि वृक्षेषु प्राण, चेतना, संवेदनशीलता च स्वीकुर्वन्ति, येन एषः विषयः प्राचीन-भारतीय-चिन्तन-परम्परायां दृढतया प्रतिष्ठितः इति ज्ञायते। आधुनिक-वैज्ञानिक-अनुसन्धानानि, विशेषतः जगदीशचन्द्रबोसादिभिः कृताः प्रयोगाः, अपि वृक्षेषु संवेदनशीलतां प्रतिक्रियाशीलतां च समर्थयन्ति। अतः प्राचीन-शास्त्राणां सिद्धान्ताः केवलं आध्यात्मिक न, अपितु वैज्ञानिकदृष्ट्या अपि सार्थकाः सन्ति इति प्रतिपद्यते।

**सन्दर्भग्रन्थानुसूचिः**

१) अथर्ववेद संहिता, सातवलेकर, स्वाध्याय मंडल, पारडी
२) ऋग्वेद संहिता, सातवलेकर, स्वाध्याय मंडल, पारडी
३) ऐतरेय उपनिषद्, गीताप्रेस गोरखपुर, सं.-२०००
४) ऐतरेय ब्राह्मण – प्राच्यभारतीयग्रन्थमाला -१४, वाराणसी, १९८०
५) कौषीतकि ब्राह्मण – युगनिर्माणयोजना प्रेस, मथुरा
६) बृहत्संहिता, वराहमिहिर, चौखम्बा प्रकाशन, वाराणसी, १९८३
७) बृहदारण्यक उपनिषद्, गीताप्रेस गोरखपुर, सं.-२०५८
८) महाभारत शान्तिपर्व – गीताप्रेस गोरखपुर
९) यजुर्वेद संहिता, सातवलेकर, स्वाध्याय मंडल, पारडी
१०) षड्दर्शनसमुच्चयः – भारतीय ज्ञानपीठ प्रकाशन, दिल्ली, १९९७
११) वेदों में विज्ञान – डॉ. कपिलदेव द्विवेदी, विश्वभारती अनुसंधान परिषद्, ज्ञानपुर, २०००
१२) अमरकोश :- अमरसिंह, चन्द्रिका प्रेस, लहरिया सराय, दरभंगा, १९१७
१३) वाचस्पत्यम् – श्री तारानाथ तर्क वाचस्पति भट्टाचार्य, चौखम्बा संस्कृत सीरीज, वाराणसी -१९९०
१४) शब्दकल्पद्रुमः – राधाकान्तदेव बहादुर, चौखम्बा संस्कृत सीरीज, वाराणसी, १९६१

**सन्दर्भः**

१) षड्दर्शनसमुच्चय, कारिका ८४

२) अयमात्माब्रह्म सर्वानुभूः (बृ.उ. २.५.१४)

३) विज्ञानमानन्दं ब्रह्म (बृ.उ. ३.८.२८) प्रज्ञानं ब्रह्म (ऐ.उ. ६.३)

४) चेतति त्मन् अमर्त्योऽवर्त्र औषधीषु । ऋग्. ६.१२.३

५) महद् ब्रह्म ..........येन प्राणन्ति वीरूधः।– अ. १.३२.१

६) अस्थुर्वृक्षाः ऊर्ध्वस्वप्नाः।– अ. ६.४४.१

७) ऋग्. १०.९७.१ – २३

८) यजु. १६.१७

९) अथर्ववेद १८.२.७

१०) तस्माद् वनस्पतीनां संवत्सरे वृक्णमपि रोहति ।-अ. ८.१०.१८

११) बृ. उ. ३.९.२८

१२) कौ. ब्रा. - १२.७

१३) ऐ. ब्रा. - २.४ एवं १०

१४) शान्तिपर्व १८४/६

१५) शान्तिपर्व १८४/१०

१६) शान्तिपर्व १८४/११

१७) तमोषधीर्दधिरे गर्भमृत्वियं - ऋ. ७.४.५ ।१०.९१.६

१८) ऋग्. १.६७.९, ६.१२.६

१९) येनौषधीर्मधुमतीरकृण्वन् । अ. ४.२३.६

२०) कौ. ब्रा. - १०.६

२१) कौ. ब्रा. - यद् उग्रो देव ओषधयो वनस्पतयस्तेन ।

२२) शान्तिपर्व १८४/१३

२३) शान्तिपर्व १८४/१४

२४) उत्स्त्रोतसस्तमः प्राया अन्तःस्पर्शा विशेषिणः -भा.पु. - ३.१०.२०

२५) शीतवातातपैः रोगो जायते पाण्डुपत्रता । -बृहत् . ५५.१४

२६) बृहत् . ५५.१५

२७) अ. २.८.३.

२८) शान्तिपर्व १८४/१६

२९) कौ. ब्रा. - १०.६

३०) वैशेषिकदर्शन – ३०